नं० ४९४७

नाम - पद्धति रत्नमाला

कर्ता - राघवानन्दः जालंधरस्थः

पत्र संख्या - ८ पत्राणि सं० —— ×

विषयः - तंत्रम्

पद्धतिरत्नमाला

४८४७

4947

F = 8

पञ्चस्तिरत्नमालाया



रा॰ प॰

ओम् श्रीगणेशायनमः चित्तागारमधिष्ठिताखिलतमोराशेर्विनाशक्षमः स्फूर्जन्नव्यदशासमाश्रितरुचिश्चित्तेदोल्लसद्विग्रहः पिंछोत्कृष्टविभूतिभूषिततनुर्भास्वत्प्र
भामंडलः शंभुर्मंगलदीपनामुपगतोभ्युद्यान्ममश्रेयसे १ नमाम्हिमगिरिबालाहिमकरकिरणोल्लसज्जालाम् पदनतिसुरत्नमालां तनुते श्रीराघवानन्दः २ अलसे
र्नागमज्ञैर्बालैरसंप्रदायैश्च प्रागल्भ्यमधिकमाप्तुं स्वमिंयं परिशीलयन्तां सततं ३ दीक्षाख्यं प्रथमं रत्नं निरुक्त्याभिधं ततः शिष्याचरणरत्नं च निमित्तार्चनरत्नकं ४ का
म्यकर्माभिधं रत्नं सप्तैवमत्र यथाक्रमं दीक्षारत्ने प्रथमतो लक्षणं गुरुशिष्ययोः ५ दीक्षाफलं ततो दीक्षाकालदेशविवेचनं मंत्रसंशोधनोद्धारौ वास्तुपूजणाहवाचनं ६
अंकुरारोपणविधिः सर्वतोभद्रमंडलं अधिवासनकर्म च दीक्षा सर्वदिने स्मृतं ७ क्रियावतीवर्णमयी तथैव च कलावती अथो वेधमयी दीक्षा ततः संदोपलनः पं ८ तत्र
दीक्षितस्यैव सकलकर्माधिकारित्वं दीक्षा तु गुर्वधीनातः प्रथमं गुरुलक्षणमाह कुलचूडामणौ कुलीनः सर्वविद्यानामधिकारी निगीयते दीक्षामंत्रः स एवात्र सर्वमंत्र
साधनापरः कुलीनः कुलार्णवे उक्तः यो भवेत्कुलतत्त्वज्ञः कुलागमविशारदः कुलार्चनपरः स स्यात्कौलिको दांभिको परः कुलभक्तः कुलाचारात्कुलाभिज्ञः कुलव्रतान्
प्रीतो भवति यो दृष्ट्वा कौलिकः स तु मे प्रियः तत्त्वत्रयस्य करणं मूलमंत्रार्थतत्त्ववित् देवतागुरुभक्तश्च कौलिकः स्यात्तु दीक्षया यशोऽस्तु नाधिकारः यश्च स्तु द्विविधो दे
विरुद्वर्णसकर्मेरवः अस्याधिकारः पूजायां न गुरुत्वे कदाचन द्विविधस्तु कुलाचारनिंदको निंदकश्च सः शाक्तदीक्षापरमेतत् गुरुलक्षणं कुलार्णवे श्रीगुरुः परमे
शानिः शुद्धवेशो मनोहरः सर्वलक्षणसंयुक्तः सर्वावयवशोभितः सर्वागमार्थतत्त्वज्ञः सर्वमंत्रविधानवित् लोकसंमोहनाकारो देववत्प्रियदर्शनः सुमुखः सुलभः स्वच्छः
शुद्धांतश्छिन्नसंशयः इंगिताकारचेष्टाविद्दूरतः कृतकृज्जनः अंतर्लक्ष्यो बहिर्दृष्टिः सर्वज्ञो देशकालवित् आज्ञासिद्धस्त्रिकालज्ञो निग्रहानुग्रहक्षमः वेदवेदान्तविज्ञाता सर्वजी
वदयापरः स्वाधीनेंद्रियसंचारः षड्वर्गविजयक्षमः अग्रगण्यो निगंभीरः पात्रापात्रविशेषवित् निर्मलो नित्यसंतुष्टो निर्द्वंद्वो नित्यशक्तिमान् साधकवत्सलो धीरः कृपालुः स्मि
शिष्य॰ तपूर्ववाक् भक्तप्रियः सर्वसमो दयालुः सर्वशासिता शिष्टदेवगुरुः शास्ता वनितासज्जनोत्सुकः नित्यनैमित्तिककाम्यरतः कर्मस्वनिंदिते रागद्वेषभयक्रोधदंभाहंकारवर्जितः
स्वविद्यानुष्ठानरतो विद्यानां च प्रकाशकः यदृच्छालाभसंतुष्टो गुणदोषविभेदकः स्त्रीधनादिषु नासक्तो दुःसंगव्यसनोज्झितः अलोलुपो हि सत्कर्म यं न जानाति विचक्षणः
वित्तविद्यादिभिर्मंत्रयंत्रतंत्राद्यविक्रयी निःसंकल्पो निर्विकल्पो निश्चितात्माति धार्मिकः तुल्यनिंदास्तुतिर्मौनी निरपेक्षो नियामकः इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये शु
द्धचित्तो दयालुश्च ब्राह्मणो वेदपारगः कुलाचाररतो नित्यं कुलशास्त्रप्रयोजकः शांतः स्वाधीनसर्वज्ञो लोभमोहविवर्जितः क्रोधमोहपरित्यागी विरागी वीरवंदितः निगमागमवेत्ता च
प्रसन्नवरमानसः सर्वाश्रयपरित्यागी ललनार्चनतत्परः ईदृग्लक्षणसंयुक्तः स जयेद्गुरुमादरात् महाकपिलपांचरात्रे नातिबालो न वृद्धश्च न खंजो न कृशस्तथा नाधिकांगो न
हीनांगो न खल्वाटो न दंतुरः कृतज्ञं वाग्मिनं शूरं प्रतिष्ठागमपारगं वास्तुविद्यार्हतां व्यासं शल्योद्धारविवेकिनं क्रियानुक्रमवेत्तारं मुद्रातंत्रविवेकिनं तत्त्वसारे वक्ष्याम्यदोषसूची च
विषयादिषु लोलुपः हेतुवादरतो दुष्टो वाग्वादी गुणनिंदकः अरोमा बहुरोमा च निंदिताश्रमसेवकः कालदंतोऽसितोष्ठश्च दुर्गंधिश्वाससंवाहकः दुष्टलक्षणसंपन्नो यद्यपि स्व
यमीश्वरः बहुप्रतिग्रहासक्त आचार्यः श्रीक्षयावहः तथा अपुत्रो मतपुत्रश्च कुंडश्च वामनस्तथा कुनखी श्यावदंतश्च स्त्रीजितश्चाधिकांगकः हीनांगः कपटी रोगी बहुवल्गीव
कुत्सकः एतैर्दोषैर्विहीनो यः सद्गुरुः शिष्यभाजनं स्वनाम्नानगुरुः कार्यो भार्या चमात्रनामिका देशकालगुणाचाररूपशीलगुणान्वितः अर्थस्वभावसंपन्नो गुरुः स्याद्गुरुण
क्रतः शारदायां गुरुपार्थसमावाप्यैः सत्क्रियो गुरुमाश्रयेत् मातृतः पितृतः शुद्धः शुद्धभावो जितेंद्रियः सर्वागमानां सारज्ञः सर्वशास्त्रार्थतत्त्ववित् परोपकारनिरतो
जपपूजापरायणः अमोघवचनः शांतो वेदवेदार्थतत्त्ववित् योगमार्गानुसंधायी देवताहृदयंगमः इत्यादिगुणसंपन्नो गुरुरागमसंमतः शिवपदनौ मध्यदेशकुरुक्षेत्र ना
भोजायनसंभवाः अन्तर्वेदप्रतिष्ठानआवंत्याश्च गुरूत्तमाः गौडाः साल्वाजवाः सौरा मागधाः केरलास्तथा कौशलाश्च दशार्णाश्च गुरवः सममध्यमाः कार्णाटनर्मदारूढक

दात्तीरोद्भवास्तथा कालिंगाः कामरूपाश्च कांबोजाश्चाधमाः स्मृताः भिल्लभश्चवनस्थेभ्यो वृत्तिभ्य श्च महेश्वरि गुरुस्योभोगमोक्षार्थी मंत्रदीक्षां न चाचरेत् म्लेच्छाश्रयः क्रियाहीनाः यतयो निष्परिग्रहाः
वनस्थाः साद्ध्याय वर्णिनस्तथाश्रमी यतः अतस्तेषां नाधिकारो दीक्षादाने महेश्वरि पितृदीक्षायते दीक्षा दीक्षा च वनवासिनाम् विविक्ताश्रमिणां दीक्षा पुत्रायुर्धननाशिनी निर्वीर्यः पितुर्मंत्रेता
थामातामहस्य च सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च १८ इति गुरुलक्षणम् अथ शिष्यलक्षणं कुलार्णवे सद्विप्रं तं कुले जातं निःसर्वलक्षणसंयुतं शमादिसाधनोपेतं गुणशीलसम
न्वितं शुद्धदेहान्ववायाढ्यं धार्मिकं शुद्धमानसम् दृढव्रतं सदाचारं श्रद्धाभक्तिसमन्वितम् कृतज्ञं पापभीतं च साधुसज्जनसंमतम् आस्तिकं दानशीलं च सर्वभूतहिते रतम् विश्वासविनयोपेतं
वित्तशाठ्यविवर्जितम् असाध्यसाधकं शूरं बलकांतिसमन्वितं अनुकूलक्रियायुक्तम् अप्रमत्तं विचक्षणं हितसत्यमितस्निग्धभाषणं मुक्तदूषणं सकृदुक्तग्रहीतार्थं चतुरं बुद्धिविस्तरं गूढहृत
त्पाशनोत्संगं निर्विकारमसेचकं विमृष्यकारिणं वीरं मनोदारिद्र्यवर्जितम् सर्वकार्यतिकुशलं धीरं सर्वोपकारकं अन्यापिपरनिंदायां विमुखं स्तवप्रिये जितेन्द्रियं समं तुष्टं धीमंतं ब्रह्मचा
रिणं त्यक्ताधिक्यादिचापल्यं दुःशंकातंकवर्जितम् गुरुध्यानस्तुतिकथासेवनाभजनोत्सुकम् गुर्वाज्ञापालकं देवि गुरुकीर्तिप्रशंसकं गुरुवाक्यप्रमाणज्ञं गुरुशुश्रूषणे रतम् चित्तानुवर्तिनं श्र
द्धाकारिणं कुलनायिके लज्जाभिमानगर्वादिवर्जितं गुरुसंनिधौ निरयेद्गुरुकृत्ये तत्प्रसादाभिकांक्षिणं ईषज्ज्ञानादिनिरतं मोक्षमार्गाभिगामिनं इत्यादिलक्षणोपेतं गुरुः शिष्यं परिग्रहेत् दुष्टा
न्ववायजं दुष्टं गुणहीनं विरूपिणं परशिष्यं च पाखंडं धूर्तं पंडितमानिनम् हीनाधिकविकारांगं विकलावयवान्वितं पंगुमंधं च बधिरं मलिनं व्याधिपीडितं उच्छिष्टं दुर्मुखं चापि स्वेच्छावेशधरं वि
ट् दुर्विदग्धं उच्चैष्टं च कुटिलं भीमवीक्षणं निद्रालस्ययुतं तंद्रासूतादिव्यसनान्वितं कपाटकुशलं भादोतिरोहितं तनुं सदा स्मृत्ययुक्तिकरं दुष्टं श्रद्धाभक्तिविवर्जितम् किमेकवादिनं स्तब्धं प्र
च्यकं चपलं माठं धनस्त्रीशुद्धिरहितं निषेधविधिवर्जितं रहस्यभेदकं चापि देवकार्यार्थघातकं मात्सीरवकवृत्तिं च रंध्रान्वेषणतत्परं मायान्वितं कृतघ्नं च प्रकृत्यंतरदायकं विश्वास
घातकं देवद्रोहकं पापकारकं अविश्वासमवद्यागमनं यैसिद्धिकांक्षिणं आततायिनमादिं तु कुत्सितं कूटसाक्षिणं सर्वत्र याचकं देवि सर्वोत्कृष्टाभिमानिनं असमंजस निष्ठुचासकं ग्राम्यादि
वड्भाषिणं दुर्विचारकुतर्कादिकारकं कलहप्रियम् दृष्टान्तक्षेपकं ग्राम्यकं वा स्विडंबकं परोदेहदूषणकरं प्रमत्तं प्रियवादिनं वाचूकं वादिनं विद्याचोरमात्मप्रशंसकं गुणासहिष्णुं स
ह्रीतमतिक्रोधसमन्वितं चार्वाकं दुर्जनं सर्वसर्वलोकविगर्हितं पिशुनं परसंतापं सर्वप्राणिभयंकरं आक्रोशवादिनं मित्रद्रोहिं संभ्रांतं वंचकं जिह्मोपसर्पपरं देवि तस्करं पशुचेष्टितं अका
रणं देवहास्यकं शक्रोधादिकारकं अतिहास्यस्य कर्तारं भ्रमांतः परिहासकं कामुकं चातिनिर्लज्जं मिथ्याडंबरसूचकं असूयामदमात्सर्यदंभाहंकारसंयुतं ईर्ष्यापैशुन्यपारुष्यकार्पण्य
क्रोधशालिनं अधीरं दुःखितं द्रव्यममत्वेन त्ववर्जितं अप्रसिद्धमतिं मूढं चिंताकुलितमानसं तृष्णालोभयुतं दीनं मत्तं सर्वयाचकं वक्रपाणिं कपटिनं ग्रामकं कुटिलं प्रिये भक्तिश्रद्धादयाशांतिय
शौचाचारविवर्जितं मातापितृगुरुभ्रातृमहतां हास्यकारकं कुलद्रव्यादिवीभत्सं गुरुसेवाभिमानिनं स्त्रीदुष्टसमयभ्रष्टं गुरुद्रोहं कुलेश्वरि इत्यादिविगुणोपेतं गुरुः शिष्यं परित्यजेत् स्नेहाद्वा लोभतो वापि
यदि रक्तानि दीक्षयेत् तस्मिन् दोषस्य शिष्येतु देवताशापमाप्नुयेत् तस्मादेवं विधं शिष्यं न गृह्णीयात्कथंचन यदि गृह्णाति लोभेन तत्पापे लिप्यते गुरुः मंत्रिपापं च राजानं पतिं जारकृतं यथा तथा शि
ष्यकृतं पापं प्रायो गुरुः समपिस्पृशेत् ज्ञानेन क्रियया वापि गुरुः शिष्यं परीक्षयेत् संवत्सरं तदर्धं वा तदर्धं वा तदर्धं तः उत्तमानधमे कार्ये नीचा तत्तमकर्मणि प्राणद्रव्यप्रदानाद्येरादेशैश्च समास
तैः तन्मर्महृच्च केनापि करोमी याभिः क्रूरचेष्टितेः पदापातैर्हदासीनैरन्नैश्चर्मसुजर्ज्ज्वरैः आकृष्टः पीडितो वापि यो विषादं न याति च गुरुपापं करोम्येवं च संकीर्तयेत्सदा श्रीगुरुस्मरणेवापि की
र्तनेचापि वंदने परिचर्यायामाज्ञाने प्रेषणे च कर्मणि प्रिये आनंदकं च रोमांचस्वरनेत्रादिविक्रिया येषां जायते योग्याः ते मंत्रसिद्धिरवीश्वरि सारदायां शिष्यः कुलीनः शुद्धात्मा पुरुषार्थपराय
णः अधीतवेदः कुशलो दृढमुक्तमनोभवः हितैषी प्राणिनां नित्यमास्तिकस्त्यक्तनास्तिकः स्वधर्मनिरतो भक्त्या पितृमातृहितोद्यतः वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः एतादृशगुणोपेतः शि
ष्यो भवति नापरः एकाब्देन भवेद्योग्यो ब्राह्मणः श्रद्धयान्वितः वैश्यो वर्षैस्त्रिभिः शूद्रश्चतुर्भिर्वत्सरैर्गुरुः सम्यक् शुश्रूषुः परीक्ष्यो दीक्षायागव्रतादिषु इति शिष्यलक्षणम् कृते श्रुत्युक्तमार्गस्तु त्रेता
यां स्मृतिसंभवः द्वापरे तु पुराणोक्तः कलावागमसंभवः अशुद्धाः शूद्रकल्पा हि ब्राह्मणाः कलिसंभवाः तेषामागममार्गेण शुद्धिर्न श्रौतवर्त्मना तस्मादावश्यकी दीक्षा सेवी कानेक वाक्पतः
सम्यग्विचार्य शास्त्राशास्त्रराशि चक्रादिभेदतः दीयते ज्ञानममलं क्षीयते पापसंचयं तस्माद्दीक्षेति सा प्रोक्ता वांछितार्थप्रसाधिनी ज्ञानं दिव्यं यतो दद्यात्कुर्यात्पापक्षयं ततः तेन दीक्षेति लोकेऽस्मिन् कथि
ता तंत्रपारगैः ब्रह्महत्या सुरापानस्वर्णस्तेयादिपातकं उपपातकलक्षाणि हंति दीक्षा श्रयान्नः दीक्षिता ब्राह्मणा यांति ब्रह्मलोकमनामयम् इंद्रलोकं च क्षत्रिया यांति प्राजापत्यं तथा विशः यांति गं
धर्वनगरं शूद्रा दीक्षाप्रभावतः चतुर्णामेव वर्णानामतो दीक्षा प्रशस्यते अदीक्षितानां मर्त्यानां दोषाः संति तु पंडिताः अन्नं विष्ठासमं तस्य जलं मूत्रसमं पिबेत् अदीक्षितकृतं श्राद्धं श्राद्धं चापि ति
तस्य च गृहीत्वापि नरस्ते घोरं नरके च सुदारुणे पतंत्येव न संदेहो यावदिंद्राश्चतुर्दश सदुह्वे हयपचारैश्च भक्तियुक्तो यजेद्यदि तथाप्यदीक्षितस्यान्नं देवा गृह्णंति नैव च कर्माखिलं कृत्वा यस्मात्तस्मा
तस्य द्दीक्षितो भवेत् अदीक्षितस्य मरणे रौरवं नरकं व्रजेत् आचार्यादनभिप्रायः प्राप्नुयाद्यदि दक्षिणां स ततं जप्यमानोपि मंत्रः सिद्धिं न गच्छति द्विजानामुपनीतानां स्वकर्माध्ययनादिषु तथाज्ञादी २४
क्षितानां च मंत्रदेवार्चनादिषु नाधिकारोस्त्यतः कुर्यादात्मानं शिवसंस्कृतं यद्दत्तं यच्च हुतं वापि यच्चान्नं लेनवा पत्रेहितं च गाथा वक्त्रजसमपि निष्फलं स्नेहाद्वा लोभतो वापि यदि गृह्णा
त्यदीक्षया तस्मिन्दोषं च शिष्ये च देवताशापमाप्नुयेत् गुरुमुख्यो किया सर्वा भुक्तिमुक्तिफलप्रदा तस्मात्स्याद्गुरोर्नित्यमत्यर्थं तु समाहितः दुर्वृत्तस्य क्रियाः सर्वा निष्फलाः स्युर्यथा ध्रुवं अदीक्षि
तायें कुर्वंति जपपूजादिकाः क्रियाः न फलंति प्रिये तेषां शिलायामुप्तबीजवत् इति दीक्षामाहात्म्यं अथ दीक्षाकालाः चैत्रे दुःखाय दीक्षा स्याद्वैशाखे रत्नसंचयः मरणं भवति ज्येष्ठे चाषाढे बंध

जन्मचंद्रः शुभः प्रोक्तो जन्मनक्षत्रवर्जितः शुक्लपक्षे द्वितीयस्तु
पंचमो नवमस्तथा गोचरे ये ग्रहाः शुद्धास्ते युक्तोऽपि शुभः शशी ॥ ९

नाशनम् समृद्धिः श्रावणे नूनं भवेद्भाद्रपदे तथा प्रजानाशो ह्याश्विने तु भवेत्सर्वशुभमेव च ज्ञानं स्यात्कार्तिके सौख्यं मार्गशीर्षे भवेत्किल पौषे ज्ञानदायी माघे भवेन्मेधाविवर्द्धनं फाल्गु
ने सर्वसिद्धिः स्यान्मलमासं विवर्जयेत् अथाथ तिथिप्रमाणं शुक्लपक्षे शुभादीक्षा कृष्णे स्यात्पंचमीं यावधिः प्रतिपद्द्वितीयायां तृतीयायां शुचिर्भवेत् चतुर्थ्यां वित्तनाशः स्यात्पंचम्यां बुद्धिवर्द्ध
नम् षष्ठ्यां ज्ञानदायी सौख्यं लभते सप्तमीदिने अष्टम्यां बुद्धिनाशः स्यान्नवम्यां वपुषः क्षयः दशम्यां राज्यसौभाग्यमेकादश्यां शुचिर्भवेत् द्वादश्यां सर्वसिद्धिः स्यात्त्रयोदश्यां दरिद्रता तिर्यग्यो
रा॰ दी॰ प॰ २ निश्चतुर्दश्यां तु निर्मासावसानके मंत्रारंभे बुधो शुक्रो बुधो जीवो विशेषतः भानौ भृगुः तायो भौमे सोमे सर्वं च निष्फलं श्री ... तारोहिणी ... उष्णं ... हस्तः स्वाती अनुराधा च मघा
मूलं च रेवती अभिजिच्छ्रवणं चैव दीक्षानक्षत्रमुत्तमं योगाश्च प्रीतिरायुष्मान् सौभाग्यः शोभनः शुभः सुकर्मा च धृतिर्वृद्धिर्ध्रुवः सिद्धिश्च हर्षणः वरीयांश्च शिवः सिद्धो ब्रह्मा इन्द्रश्च षोडश
शकुन्यादीनि विष्टिं च विशेषेण विवर्जयेत् शुभानि करणान्याहुर्दीक्षायां च विशेषतः मेषाद्यारंभणे मेषे धनधान्यप्रदं भवेत् वृषे मरणमाप्नोति मिथुने पत्यनाशनं कर्कटे सर्वसिद्धिः स्यात्सिंहे
मेधाविनाशनं कन्यायां लक्ष्मीप्रदानित्यं तुलायां सर्वसिद्धयः वृश्चिके सर्वसिद्धिः स्याद्धनुर्ज्ञानविनाशनः मकरः पुत्रदः प्रोक्तः कुंभो धनसमृद्धिदः मीनो दुःखप्रदो नित्यमेवं राशिफलं विदुः धर्मदः
प्रातःकालः स्यात्संगवो राज्यदायकः मध्याह्ने सर्वसिद्धिः स्यात्सायाह्ने मध्यमो भवेत् रजनी मंत्रदाने तु निषिद्धा देशिकोत्तमैः चरं सर्वाणि वर्ज्यं स्यात्स्थिरराशौ तु सौख्यदा स्थिरलग्ने विशुभं मंत्रे शिवमंत्रं च
रे शुभम् द्विस्वभावगते लग्ने शाक्तमंत्रः प्रशस्यते त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः दीक्षायां तु शुभाः सर्वे वक्रस्थाः सर्वनाशकाः तृतीयैकादशो षष्ठे दशमे चशुभः शशी शुभमध्यस्थि
तो वापि चंद्रमाः शुभदो भवेत् शुक्रोऽस्तोऽयदि वाप्यस्तो गुरुर्वा दितो भवेद्यदि मेषवृश्चिकसिंहेषु नत दीक्षां न विद्यते अयने विषुवे चैव षडशीतिमुखे तथैव च ग्रहणे च महातीर्थे न कालस्य विचारणा तत्र
श्री^ सीनिकटे विल्वमूले धात्रीतले तथा अनादिदेवसान्निध्ये महादेवे गवां गृहे देवीक्षेत्रादिने वापि नास्तिकालस्य निर्णयः योगिनीतंत्रे रविसंक्रमणे चैव हर्षचंद्रग्रहे तथा तत्रालस्यादिकं किं
चित्र किंकार्यं कदाचन महाकृष्ण्यां विशेषेण धर्मकामार्थसिद्धये न कुर्यात्कौलिकी दीक्षां शुक्लपक्षे विभावसौ न कुर्याद्देवसवी दीक्षां तथा चेन्द्रसमो ग्रहे इति रुद्रयामलतंत्रोक्तम् कालीतारामहावि
द्याषोडशीभुवनेश्वरी भैरवी छिन्नमस्ता च विद्याधूमावती तथा बगला सिद्धविद्या च मातंगी कमलात्मिका एता एव महाविद्या निमहाविद्याः प्रकीर्तिताः नात्र सिद्धाद्यपेक्षास्ति नक्षत्रादिविचारणा का
लादिशोधनं नास्ति साध्यादिह्वास्तं नहि तिथिर्विनापि दीक्षायाविशिष्टवमरं शृणु दुर्लभे सद्गुरूणांतु सकृत्संगउपस्थिते तदनुज्ञा यदा लब्धा सदीक्षावसरो महान् ग्रामे वा यदि वारण्ये क्षेत्रे वा दिव
से निशि आगच्छति गुरुर्दैवो यदा दीक्षां नदाम वेत् यदैवेच्छा तदा दीक्षा गुरोराज्ञानुरूपतः न तिथिर्न व्रतं होमो न स्नानं न जपक्रिया दीक्षायाकारणं किंतु स्वेच्छावाप्ते तु सद्गुरौ तारामंत्रे तु विशेषः हंस
कुदे= पतस्य चाष्टम्यां शुभे लग्ने शुभे दिने सर्वेमास देवं कोमित्रनाम सुसंयुते अथवा चानुराधायां रेवत्यां तु प्रशस्यते जानीयाच्छोभनं कालं मंत्रसंग्रहणं प्रति इषे चैव विशेषेण कार्तिके च विशेषतः महाची
नक्रमे लेवन दीक्षानीलक्षणादे न सिद्धादिन तारा च न राशि चक्रशोधनम् नक्षत्रेण न धनेचकेन मासनियमस्तथा न पक्षतिथिन देवत्र न्याजो वारो कुजार्कजो इति कालनिर्णयः अथ देशाः पुण्यतीर्थे कु
रुक्षेत्रे देवपीठ चतुष्टये प्रयागे श्रीगिरौ काम्ये कालाकालं न शोधयेत् गयायां भास्करे क्षेत्रे विजे चंद्रपर्वते मतंगे मंडले चैव तथा कस्माश्रमेषु च नगस्त्रीया नतो दीक्षा तीर्थेष्वेषु पार्वति इति दीक्षादेशानि
र्णयः अथ मंत्रशोधनम् शारदायां बालं गौरं दुःखं उष्णं लक्ष्मी मिश्रो भेत् राशिषु क्रमेण भेदितावर्णाः कन्यायां शादयः स्मृताः अस्यार्थः अथ द्वादशराशीनां कचटतपयवर्गीतरसंख्येयावर्णाः
ध्रि ५ तवाः चतुस्त्रित्रिद्विद्विपंच पंच कं चतुः संख्या कन्यायां अश्रः इति द्विवर्णा शादयः अश्रः साधुसरुल द्वं कन्या तथा च मेष अ ४ वृष उ ३ मिथुन ऋ ३ कर्क ए २ सिंह ओ ३ कन्या अश्रः शा ६
तुला क ५ वृश्चिक च ५ धनुः ट ५ मकर त ५ कुंभ प ५ मीन य ४ साध्यस्यादिराशेरारभ्य गणयेत्साधका तरान् एकपंचनववेधवाम नाद्दौ च षड्दशाष्टमाश्च सेवकाः वह्निरुद्रमनुयस्तु पो
अष्टवेदखयस्तु = षकाद्वादशाश्च वारस्तुद्याग्तकाः अथवा तनुर्धनं भ्रातृबंधुपुत्रास्तुकलत्रकाः मरणं धर्मकर्मीयव्यया द्वादशराशयः तथा च स्वद्वितीया मीयोम त्रो धनदः स्वतृतीयता मीयोऽभ्राद
लवचत्वर्यामी दः स्वपंचमराशीयः पुत्रदः सप्तमराशीयो भार्याप्रदः एवमन्यद्र्रष्टव्यं सूत्रराशिन द्वत्रयो षडशे मरवेद्वादशाक्षत्राय त्रपतति तदेव साधकस्य विराशि नदा तु तथा समे तं त्रक प्रणयनवेय
घः दं५८ र्थं मंत्रमेत्रार्थता यो विनिगमकाभावात् राशिचक्रमधिकृत्य तेन मंत्राद्यवर्णेन गणये स्तुः बहिः वाथ एवा द्वादशं तु वा रिपुर्मंत्राद्यवर्णस्यान्तर्न तस्य सिद्धिर्न भवेदिति प्रयोगमुद्धिश्य नेत्रराजव
चनाच्च वस्तुतस्तु प्रकटं यत्स जन्मदीयस्य जन्मतः तोभवेत् प्रणष्टजन्म भयस्य तस्य नाम तु तोभवेदिति पिंगलामतवचनाद्यवस्था अथाकथहचक्रं तन्त्रराजे आकथहद्वितीयद्रव्यस्तत्रपूर्व
कयोगतः कोष्ठानि षोडशोत्र सुलिखवर्णक्रमाल्लिखेत् प्रथमप्रथमे त्वाद्ये द्वितीयप्रथमे तथा द्वितीयमुख्ये तस्या न तथा नदपि कल्पयेत् तत्त कोष्ठेषु विलिखेत्तत्तत्संचममंतरं एवं चतुर्षु
वर्णेषु संतावधिक्रमाल्लिखेत् स्वनामाद्यं तदंश यत्र कोष्ठे संस्थापते ततः सिद्धादीनां प्रयावन्मंत्राद्यत्वदर्शनं सिद्धसिद्धजपात्सिद्धे द्विगुणात्सिद्धसाधकः सिद्ध सुसिद्धः समस्यात्सिद्धारिह
तिर्मात्रजान् साध्यसिद्धो निर्संहोपात्साध्यसाध्योनि दुःखिवह साध्य सुसिद्धो भजनात्साध्यारिः स्वात्मियुपदेश सुसिद्धसिद्धो ध्यायनात्फलं दद्याद्यभीप्सितं सुसिद्धसाध्योजपाद्वे सिद्धये स्याद्तोऽन्यथा
सुसिद्धसुसिद्धस्तु देवं जन्मकृतः शुभः तस्मात्सर्वसिद्धीनां साधने योजयेन्मनुं अभिचारेरिपौ रेवदा दत्तात्मविपन्नये सुसिद्धारिः समो वेलसत्कुलान्नाशयेद्ध्रुवं अरिसिद्धः स्वतन्त्र्यादरिसाध्यः स्व २
यादितं अरौ सुसिद्ध मंत्रस्तु कुलोत्सादनकृद्भवेत् अर्यरिः स्वात्मकामं त्रसंज्ञो वेद्रतु निश्चितं पिंगलामते तु यथोक्तात्सिद्धमंत्रस्तु तत्साध्यो द्विगुणाज्जपात् तत्सुसिद्धोऽयक्तादेव तदरिर्बाधयान् वहः
सिद्धात्तु पात्साध्यसिद्धस्तत्साध्यस्तन्निरर्थकः तत्सुसिद्धः साईजपानुदरिर्गोत्रजापकः सुसिद्धसिद्धोर्इजपात्तत्साध्यो द्विगुणाज्जपात् तत्सुसिद्धो यत्ता देव तदरिर्जातिजानकः अरिसिद्धः सुतं हन्यादरिसाध्यस्तु कन
कां तहत्कल्पस्तु पत्नी हन्त्यदरिः साधकायतः अरिसिद्धस्य क्वेनाम किंवाससजनानां च यतीनां वृथानेन गुरुणाच्च तं भवेत् नान्यत्र सेवनं तन्निर्विमकानिचकारयेत् अन्यत्रापि लोके प्रसिद्धं नामाद्यमात्रापि

ज्ञातथाकृतं सुमोजागर्ति येनासौ हूरस्यक्रमभाठांते वदत्यन्यमन कोपितन्त्रामग्रायमग्रनु हन्त्रयामलेपि मानापित्रकृतं नाम यन्त्रापामज्जने: कृतं विश्लिष्यतस्येववर्णान्स्वरव्यञ्जनभेदत: तथैव(
मन्त्रबीजानितत: शोधनमाचरेत् ङिं ङकुङिङ कोपात्मानीयजिह्वाग्रिसंभव: संकृतेष्वाराणामसमधिकाद्दारमेवच अपभ्रंशाक्षरं तुतोयकाषलक्ष्य मंत्रान्तरे:सदैकैकं नाम वर्णाश्चशु
धनं बीजेर्वीजनान्यवस्वरै: साईस्वरास्तथा आद्यामाद्येन संधा ध्वंद्वितीयेन हितीयकं मंत्रवाणप्रथवानामिवर्णा: सुविषमादसा यदाम त्रसमारभ्य समयात्तस्य योजयेत् आद्यान्त्ययो: सिद्धवर्णम
त्रेयसिल्वरानने शुचिरेतोवकालेन समचेत्स वसिद्धिद: साध्यान्तादिसुतोयस्त्वमति ककूलसिध्यति साद्यावतेसस्सिद्धस्तु सर्वकामविभूतिद: आद्यावंतेरिपुर्यस्य भवृत्याज्य: समंत्रक: स्यान्नयस्य
तारिर्यामिन्नोसमसमेतामत: फक्रं भवति यन्नाद्योमध्योसिद्धस्तादतकेसाध्य: कष्टेन कार्यसिद्धिस्स्यस्यकलस्वल्पमेवभवेत् अतेयदिभवतिरिपु: प्रथमे मुष्येचसिद्धसाध्ययुग्मकार्यविलंबितस्याप्राणाभ्यपि शुभवेभेदा
यसिद्धिश्चसिद्धवरिपुमंत्रस्यपत्नीरयेत्यान् वक्ष्यामसज्वलितं मंत्रं परिवर्जयेन्मतिमान् नारायणीयेपि दुष्टार्णप्रचुरोय: स्यान्मंत्र: सच विनिंदित: इति अकथहचक्रम् अद्गुतो भवेन्नानत्रधाव:प्र वर्णा: क्रमात्स्वरांत्यो
सप्तमेतिनः अत: स्थंतविजानीयाअदस्योवर्गउच्यते सप्तमाराचक्रम् प्रापलीमप्तप्राद्येहङस्याकरुस:कंर लोकत्लापपहप्रायखलोयोगेशुभेद्दिना: वर्णा:क्रमाक्षरत्योजरेवर्तमापनोमदा असाध्य: हांत्योतु रेवतीमता =
कचटतपयवर्गान्तारसंख्यापा: ञमेतानात्तकावर्णानन्तरविज्ञानाभवंति अंशोसांरे शुध्र: नामांसहत्वेोलतो इतिवर्णाल्पयारेवयाध्रुन्येमातृकावर्णा: क्रमेणाक्रे नमेया: तेनअपवश्यादिषु रपलभप
ररयररयररकरलकलपवररपरवलाहुहाणा द्वेकृविचतरेकेकद्वेकद्विद्वेकद्विद्वेकद्विअकद्वेकेकद्वेकद्विचिवत: संज्ञा: क्रमेण अन्यवर्णाद्युत्तरस्तोधमेवसंयुक्तानरेषुपरानदेमेव
आद्यमितिसंप्रदाय: तस्मात् अश्वाअश्विनी इभरणी ईउऊकृत्तिका ऋऋलृलृरोहिणी एमृगशिरा: ऐआर्द्रा ओओपुनर्वसु: कपुष्य: खगअश्लेषा घङमघा चमपूर्वाफाल्गुनी छजउफा:
हस्त: इचित्रा ञस्वाति टठाविशाखा तथदअनुराधा धज्येष्ठा नपफमूल बपूषा भउषा मश्रवण यरधनिष्ठा लशतभिषा वपूभा शसउभा अंअ: तत्तरेवती साधकातारा म
आतरपर्यंतगणयेत् जन्मसंपद्विपत्क्षेम प्रत्यरि: साधको वध: मित्रपरममित्रच जन्मादीनिपुन:पुन: विपदप्रत्यरि: यवधपरिमाज्यामनीषिभि: इतितारा चक्रम् कादणारेलिखेत्कवर्णा सर्वादि
त: क्रमात् गणयेसिद्धसाध्यादिफलं तेषांविनिर्दिशेत सिद्ध: सिध्यति कालेन साध्यस्तुजपहोमत: सुसिद्ध: प्राप्तिमात्रेणसाधकंभक्षयेदरि: सिद्धोनवेकवालेषु साध्यो रससरप्रातिषु सुसिद्धि
मुनीषुपुरिपुर्वेदाकृभावुषु इदं चेत्फलविषयमात्रपकम् इतिअकडमचक्रम् अथकुलाकुलचक्रम् कुलाकुलपरीत्तायाप्रकार: कथ्यतेधुना वायुग्निभूजलाकाशा: पंचाशल्लिपय: क्र
व= मात् पंचकस्यो: पंचदीर्घा विदिता: मन्त्रिसमभवा: पंचपा:कादय: तलसहाना:समीरिता: साधकस्य तु रसेसंमंत्रस्यापिनदक्षरं यदा क्रमात्तदृष्ट्वा जानीयात्सकुलचनेत पार्थिवेवारुणमित्रमाप्न
यत्पार्थिवामारुतम् पार्थिवानलत्वारुणात्मारुतेमारुतेनमन् आग्नेयस्यापिसमानुरंमससेजस: स्मृत: दषामपिचसर्वेषामविरोधिनु नाभस पदस्यवरक्रुद्धानानकुर्यान्मेलनं बुध: अत्र अधाधोद
माकोक्षु पंचधाक्रमेणैतेवर्णाभवन्ति अआईउ कचटतपयशावायवा: इईऊएदठथकरक्षा आग्नेया: उऊओगजडदबललापार्थिवा: ऋऋऔघझढधभवसाजलीया: लृलृअंङञणनमषा
नाभसाकाश: अ: इतिपंचभूतात्मक: इतिकुलाकुलचक्रम् अथषट्पदचक्रम् षट्पदं चक्रमालिख्यप्रागादिषु दलेषु च अकारादिवर्णानेकैकं लिखेत् षंडकूट कान् स्वनामाद्य(
वर्णं यत्रतदारम्य विचारयेत् उदितेसंपत्सुद्दिष्टा द्वितीये संपदातय: तृतीयेतुधनं विद्याच्चतुर्थेबंधुविग्रह: पंचमेसंशयायान्मामस्तथषष्ठ: सर्वविनाशक: इतिषट्पदचक्रम् अथगणगणचक्र(
हस्तस्वातीश्रुतिमृगपुष्यमैत्राश्विरेवतीपुनर्वसुरिति भानिदेवानिमांत्रिका: कृत्तिकाचयंबाशीभरणीरोहिणीतथा मर्त्यौकयगण:प्रोक्तोभान्येतानिविशारदे: चित्राश्लेषाम्बूलमघाध(
निष्ठाज्येष्ठकेतथा वरुणांक्रुत्तिकेन्द्राग्नीरक्षोगणउदाहृत: एकयोरुत्तमाप्रीतिर्देवपुंसोस्तुमध्यमा देवैर्मर्त्येरपिमहद्दासोवेरस्तुच्यते एवंबुध्वाबुधोमंत्रीविधिनानियोजयेत् तत्राश्विनीमृगपुन
र्वसुहस्तस्वात्यनुराधाश्रवणरेवत्योदेवगण: भरणीरोहिण्याद्रीत्रिपूर्वात्रितयमनुष्यगण: अन्येषांतुराक्षसगण: एकगणस्ययो:प्रीतिरुत्तमा देवपुंसोर्मध्यमा उभाभ्यांरक्षसोवैरं साधकमंत्रा
द्यक्षरतोज्ञेयं इतिगणचक्रम् अथयोनिजातकयोनिद्वयंचहेयम् इतोयतोमूषकमार्जारयो: क्रमसात्तातोपि महिषीअश्वीनु: सोरभी व्याघ्रीगामंडलीकपिरयोवानरशुद्धयवानर: सिंहेभयोमृग
दाहयमुष्कवरीयोनिस्तुभालामिषं तुषमुषिडाल: सोरसीमहिषीमंडल: श्वा वनुर्नकुल: करटी हस्ती विरोधस्तु गोव्याघ्रंगजसिंहमश्वमहिषंश्वैलचवभ्रुरंगचैरवानरमेषकंचसम
हन्मार्जारमूषंतथा लोकानांव्यवहारतोन्यदपिचज्ञात्वेति इतियोनिचक्रम् अथफलितचक्रम् अश्विन्यादिलिखेच्छ्रसर्पाकारं त्रिनाडिकं त्रिनाडीवेधनदेशमश्विन्यादिमतोंतरा हस्तेन्द्रमू
साधका४ लवारुणप: पूर्वाभाद्रपदातथा याम्य: सौम्योगुरुर्योनिरश्चिमित्रजलाकृय-र्यनिष्ठावोत्तराधन्यांमध्यनाडीमवस्थिता कृत्तिकारोहिणीमघोमवाखातीविशाखिके उत्तराश्रवणं पौष्णं इहनाडीस्व
वस्थिता पेति: पूर्वाफाल्गुनी जलाकृयंसृकांताद्य एकनाडीस्थितायस्य गुरुमंत्रसदेवता तत्रदेयमृणमृतुक्रमेणकलमादिशेत् तत्राश्विन्यार्द्रापुनर्वसूत्तरफाल्गुनीहस्तज्येष्ठामूलशतभि
षापूर्वभाद्रपदाश्च एमनाडीस्था भरणीमृगशिर:पुष्यपूर्वफाल्गुणीचित्रानुराधाधनिष्ठोत्तरभाद्रपदामध्यनाडीस्था कृत्तिकारोहिण्यश्लेषामघास्वातिविशाखोत्तराषाढाश्रवणरेवत्य: इह
न४ नाडीस्था एकनाडीस्थागुरुमन्त्रसाधकानित्याभिमताप्यवस्था इतिफलितचक्रम् अथाष्टवर्गचक्रम् वर्गाष्टकं समासाद्य मंत्रसाधकयो: क्रमात् अवर्ग: पक्षिणोज्ञेया मार्जारश्चकवर्गग: च
वर्गस्तथासिंहश्चटवर्गेश्वा स्मृतस्तथा तवर्गोनागईत्युक्तो मूषक: पवर्गक: यवर्गस्तुगजोज्ञेयो शवर्गोयजमेषक: गरुडमुज्ञगयोर्वैरं तथा च गजसिंहयो: मार्जारमूषयोर्वैरं तथा ऽकु(
२ रमेषयो: भुजंगसिंहयोमैत्री मेषमूषकयोस्तथा लोकादन्यच्चविज्ञेयं वैरं तारमयोगत: इत्यष्टवर्गचक्रम् अथऋणधनचक्रम् धनादिकं विदित्वातुमन्त्रसिद्ध्यादिकेपिच मंत्रवर्णे

इष्टे =

त्रयस्त्रिंशत्कोष्ठेषु नवधीमन्दिरैर्वै फलं प्रयतनतोन्यथा दत्तो नरायतं कुर्यात् अपंचकमुत्तमं आक्रान्त्य गायत्रीश्चैव भानुरेखाः प्रकल्पयेत् द्वौ द्वौ स्वरौ लिखेद्विद्वान् पंचकोष्ठेषु यथाक्रमात् एकैकमेकमालिख्य कादिलान्तं ततो नरं
२ एकैकमेकमादद्युः सैकेषु तिमिमां लिखेत् दिग्भूमिशीर्षक्रिया जाता मर्षीषु द्विपदद्विकैः गुणयेत् साधकस्यार्णान् स्वरव्यंजनभेदिनान् इदं नक्षत्रनयनं शिवं चेदग्निर्भिः अश्विन्याद्युधनाग्नेन्द्रनवभिश्च नयामनोः
नामार्णकोष्ठकमध्ये आद्यंतनिश्चितं क्रमात् हन्त्याकोष्ठगुणेनैव पंचमं पंचभिर्यथा एवं पर्यवसन्नाख्येषु गुलकाकाः समासतः सुहृन्मीनन्तरोद्यान भावकाः साधकादारे मंत्रवर्णेषु तत्र तत्र गम्भूमानुनिम्नगा नामाकु
रा·दी·प· लादकठवादष्टमकादिकं बुधैः ज्ञात्वा मध्ये ऋणं विद्यादधिकं शेषं मंत्रकं विन् उक्तं च वसुभिर्भागमाहु रेडुभयोरपि वाडुल्यं यत्र दृश्येत सोधमर्णः प्रकीर्तितः धार्यते यस्य येर्मन्त्रैर्ऋणी यावाना मन्त्रं सर्वे नदमावेस
मधनं धनिकं न कदाचन अन्येरपि विजानीयात् तस्मात्स्वं परित्यजेत् अस्यार्थः साध्यार्णस्वरव्यंजनरूपेण पृथक्कृतेन तथा साधकनामाक्षरान पीड्राद्यकोष्ठमपि हत्स्यकोष्ठगुलनं कृत्वा नये वदिगाद्यंकानपि
२ कुर्यात् नाम अचुरुलादिति स्वरव्यंजन समुदायात् अकठवादिवर्गचतुष्टयप्रभिन्नात् अइउऋलृएऐओऔअंअः अवर्गः कादिङान्तः कवर्गः चादिञान्तः चवर्गः टादिणान्तो टवर्गः तनपकादयो का
दयास्तराश्च तावर्गाः अस्मात् अकठवान् अष्टभिर्भागे हृते सति शेषफलं विसाध्यसाधकवर्गयोः श्रेष्ठवस्याधिकरूपस्य ऋणत्वमल्पस्य च धनित्वं तेषां एवं पर्यवसन्नाः इति साध्यसाधकस्यायमर्थः २।२।५।१।१।२।१।०।८।
एवं कुले लक्षमासतः संदेपेल पर्यवसन्नाः कलिताः समासतः संदेपेण गुलकाकाः अत्राद्यसंकेतः इत्याद्यंकालन्तकर्णस्यकोष्ठसंख्यया गुणितानामष्टभिर्हृतानां कृता अवशिष्टाकाः हृद्गीनन्तरोद्या
नमिवकोसाधकान्तरे गुलकाभवंति दिगाद्यंकानपि नक्षत्रकोष्ठसंख्यया गुणितान् अष्टभिर्हृतान् कृतावशिष्टाकाः नक्षत्रचगम्भूमानुनिम्नगामंत्रात्तरे गुलकाकाभवंति अंकसंख्येन क्रमसल्कप
रोक्तौवद्यमालोत्तेयः एतेनवद्वकाले साध्यनतरवद्यमालाचक्रमुक्तं इति ऋणधनचक्रम् अथापरमृणधनचक्रम् षट्कालकालविषदग्निसमुद्र वेदाक्षोकाशाम्याद्यदन्नाः स्वतुसाध्य
र्णाः सुगमट्ठ्ये चषियदेवरमुकुशमांकव्योमाश्विवेदयाशिनः साधकार्णाः नामाद्यकुलादकठवाद्यजभक्रमेण संज्ञात्वोमयोरधिकमौघमृणं धनं स्यात् अस्यार्थः षडाद्यंकैः साध्यार्णस्वरव्यंजनरूपेण पृथक्कृ
तान्कृत्वा तथा साधकनामाक्षरानपि सुगमादिभिरंकैर्गुलयेत् शेषमस्त्वंअस्यं पालनोनकश्चित्क्षिपेतः इति ऋणधनचक्रम् अथ कादिमते ऋणधनचक्रम् नामाद्यक्षरमारभ्य यावन्मन्त्रादिवर्णकं त्रिधाहृ
ऋणी = नास्तरैर्भिन्धान्नदन्यद्विपरीतकं कृत्वापिकमृणं तेन यद्वीचेन्मंत्र उत्तमः स्वयं ऋणी चेन्मन्त्रस्य जन्मं संत्यजेत्सर्वं ऋणी यतः अत्र नामाद्यक्षरं साधकस्य नामाद्यक्षरमारभ्य मंत्राद्यक्षरपर्यंतं गणने साधकराशिः म
न्त्राद्यक्षरादिसाधकनामाद्यक्षरपर्यंतं गणने मंत्रराशिः साध्यनामाद्यक्षरमारभ्य विपरीतं गं साधकनामाक्षरं यावत् त्रिभिर्गुणयित्वा स्वरैः समभिर्विभजेत् शेषं पूर्ववत् अपरोपि प्रकारः साध्यमंत्रद्विगुणितेन सा
धकेन समन्वितं अष्टभिश्च हरेच्छेषं तदन्यद्विपरीतगं अस्यार्थः मंत्राक्षराणि स्वरव्यंजनरूपेण पृथक्कृतानि द्विगुणयेत् साधकनामाक्षराण्यपि स्वरव्यंजनरूपेण पृथक्कृतानि तेन संयोजयेत् ततोष्ट इयक्रां५
भिर्हरेत् अयं मंत्रराशिः एवं साधकनामाक्षराणि स्वरव्यंजनरूपेण पृथक्कृतानि द्विगुणितानि स्वरव्यंजनरूपेण पृथक्कृतानि संयोज्य तान्यष्टभिर्हरेत् एवं साधकराशिः एवं यस्योत्तमर्णो यो मंत्रः स त
शोधनं स्यानिष्टः यस्य यश्चाधमर्णः स तस्येष्टः इति ऋणधनचक्रम् अथ हरचक्रम् चक्रभेदे हरचक्रं षड्दलं च सिद्धादिचक्रमेव च राशिनक्षत्रचक्रे च तत्कुलाकुलमेव च अकडमं चाकठवं वर्गचक्रं तथैव च उ
क्तानि नवचक्राणि मंत्रसिद्धिकराणि च नवचक्रविशुद्धा ये मंत्राः शीघ्रफलप्रदाः गणचक्रविचारोपि केचिदपि सम्मतः प्रिये अथातः संप्रवक्ष्यामि हरचक्रमनुत्तमं यज्ज्ञात्वा तात्त्विको लोके जायते मंत्रवित्तमः अथ यावद्
ग्रीवेद्यमित्यादृभगवान् शिवः तस्मात्सर्वप्रयत्नेन यः सुधीः सविचारयेत् ऊर्ध्वरेखाचतुर्देवा नानारकोष्ठसम्मितं तन्मध्ये विभजेत्कोष्ठे चतुष्कं कलितं चक्रं तारा कोष्ठं राशिकोष्ठे तेन दिक्षु चतुःकोष्ठानि विदिक्षु चतुः
कोष्ठानि मध्ये कोष्ठमेकं विदिक्षु तत्कोष्ठचतुष्कं तत्र चतुष्कं पात ये नक्षत्राक्षराः कोष्ठात्मकं राशिचक्रं भवति पातयेद्दिक्षु वर्णान् च वाणिनाराभैरवी कर्णास्त्रश्मो भयन ईशानादिषु योजयेत् त्रिपुरां भुवनेशीं च
पीठेशीं चैव चण्डकं वास्तुदेवं श्रियं चैव छिन्नमस्तां च चंडिकां ईशानाद्येषु तं ऋणं तथा इन्द्राणीं चैव देवं च पितामहमनन्तरं मत्तमायां च कालीं च मदन्यकोप्यदेवतं ईशानाद्यमिति ईशानकोणमा
रभ्य कृत्वा सर्षं पंचाशद्विलिपिवर्णानां मातृकाष्ठादिकं क्रमात् अत्र क्रमपदे न दिग्गत कोष्ठानामिष्टमृणं अशिष्यं मातापितृक्तमेव नाम ग्राह्यं न तु स्नेयेन तु ज्ञाते तत्क्रान्तरे वर्गतव्यं नामार्णं तु समारभ्य
वदेवार्णगोचरं संमुखोग्रहणं कुर्यात् मृद्गेन कदाचन धनं पुत्रं चलाभं च नित्यं नैवेव विच्छलं मुक्तिं मोक्षं च धर्मं च अरिं मित्रं च कामदं भीब्रह्मणं चिंतये कोष्ठे हरचक्रमिमीरितं अत्रापि ईशानं दक्षिणक्रमः इति ह
रचक्रम् अथाग्रापवादः नीलतंत्रे तारादक्षिणादिमत्रमध्ये नात्र सिद्धाद्येषु तालिन वामिस्त्रादिद्रूषणं एवं च एकाक्षरे तथा कूटे त्रैपुरे मंत्रनायके स्त्रीदत्ते स्वप्नलब्धे च सिद्धादीनैव शोधयेत् मंत्रे सिद्धे
पदिष्टे च तथा राज्यजेप्पि मालामंत्रेषु देवेशि सिद्धादीन्नैव शोधयेत् मालामंत्रस्तु विंशार्णादूर्ध्वस्तापिकः नृसिंहकं वराहं च प्रासादप्रणवस्य च सपिंडाक्षरमंत्राणां सिद्धादीन्न विचारयेत् प्रणवस्त्र तारी मायाव्योमवाणीपिस्वरः
प्रासादो बहुरूपाश्च मंत्रसाधारणाः स्मृताः सौरमंत्राश्च येपि स्युर्वीराहानारसिंहकाः सिद्धसाध्यसिद्धारिविचारपरिवर्जिताः संपिंडाक्षरमंत्राणां वैदिकानां च मन्वेषुः नपुंसकस्य मंत्रस्य सिद्धादीन्नैव शोधयेत् निष्प्राना
त्रेपुराणां च न तस्यास्तु शाकादयः न तथापि प्रोच्यते किंचिदभिचारादिदोषाधने अशाकादयो ह्यपादेतिचाराः तन्नप्रयोगार्थिनां तारादिमंत्रयः स्वात्पिकोष्ठादिदोषान्धनमायाति तत्क्रोधनं निषेधस्य मौनादादिमात्रपरस्तु गत
ता इति मंत्रशोधनविचारः अथ कतिचिन्मंत्रा लिख्यन्ते तत्रादौ भुवनेश्वरीमंत्राः ह्रीं शक्तिः ऋषिः गायत्री छंदः हकारो बीजं ईकारः शक्तिः रेफः कीलकं भुवनेश्वरी देवता चतुर्वर्गसिद्ध्यर्थं जपे विनियोगः पुरश्च
रणं लक्षाणि ३२ ऐं ह्रीं श्रीं त्र्यक्षर पुरश्चरणं लक्षाणि १२ ऐं ह्रीं ऐं श्रीं ह्रीं क्लीं इति भुवनेश्वरीमंत्राः ध्यानम् सिंदूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् । २
पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थसव्यचरणां ध्यायेत्परामंबिकाम् १ अथान्नपूर्णा ह्रीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा इयं श्रीबीजाद्या वाग्बीजाद्या कामाद्या प्रणवाद्या माय
याद्या ह्रीं च तीयस्त्रग्भवीजाद्येति एतेषां ब्रह्मा ऋषिः पंक्तिश्छन्दः अन्नपूर्णा देवता पुरश्चरणं सहस्राणि १६ ध्यानम् रक्तां विचित्रवसनां नवचन्द्रचूडामन्नप्रदाननिरतां स्तनभारनम्राम् नृत्यन्तमिन्दुशकलाभ

ण्टविलोलकुण्डलां भजे ऽहं भगवतीं भवदुःखहन्त्रीम् ॥ अथ त्रिपुरा ऐं क्लीं सौः ध्यानम् पारिजातवनेऽस्मिन् ... मणिकुट्टिमे रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते अथ लक्ष्मीकल्पलतास्य निषण्णां देवतां स्मरेत् संमोहन
ऋषिः गायत्री छन्दः त्रिपुरा देवता पुरश्चरणं लक्ष ११ अथ सविता ओं क्लीं ... अस्यार्जुन ऋषिः विराट् छन्दः सविता देवता ध्यानं ... कलापशोभित ... मालाविभूषिता
गुजाकारलसत्पयोधरभरानम्रां ... लक्ष ९ अथ नित्या ऐं क्लीं नित्यक्लिन्ने मदद्रवे स्वाहा संमो
हन ऋषिर्नीवृच्छन्दः नित्या देवता ध्यानं अर्धेन्दुमौलिमरुणाममलाभिरामां ... पुरश्चरणं लक्ष ४ ऐं क्लीं नि
त्यक्लिन्ने मदद्रवे स्वाहा अस्य पुरश्चरणं लक्ष ९ अन्यत्सर्वं पूर्ववत् अथ दुर्गा ओं ह्रीं दुं दुर्गायै नमः नारद ऋषिर्गायत्री छन्दः दुर्गा देवता ध्यानं सिंहस्था शशिशेखरा मरकतप्रख्या चतुर्भिर्भुजैः शङ्खं चक्रधनुः श
रांश्च दधती नेत्रैस्त्रिभिः शोभिता आमुक्ताङ्गदहारकङ्कणरणत्काञ्चीक्वणन्नूपुरा दुर्गा दुर्गतिहारिणी भवतु नो ... कुण्डला पुरश्चरणं लक्ष ९ अथ परस्य सह ... नीत्वा ... प्रणवादिः ... वीजादिक
वचादि ... भवति एतेषां सर्वं पूर्ववत् ध्यानेनु ... गारुडोपलसन्निभां मणिमौलिकुण्डलमण्डितां ... नीलकण्ठ ... वाणकार्मुक शूलकं तर्जनी
मपि विभ्रतीं निजबाहुभिः ... पुरश्चरणं लक्ष ८ ओं दुं गें दुर्गे रक्षिणि स्वाहा अस्य सर्वं पूर्ववत् ध्यानम् कालाभ्राभां कटाक्षैररिकुलभयदां मौलिबद्धेन्दुरेखां शङ्खं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहन्ती
त्रिनेत्राम् सिंहस्कन्धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयन्तीं ध्यायेद्दुर्गां जयाख्यां त्रिदशपरिवृतां सेवितां सिद्धिकामैः पुरश्चरणं लक्ष ८ अथ वागीश्वरी वद वद वाग्वादिनि स्वाहा
ह्रीं अस्य ... ऋषिर्विराट् छन्दो वागीश्वरी देवता ... ध्यानं तरुणशकलमिन्दोर्बिभ्रती शुभ्रकान्तिः कुचभरनमिताङ्गी संनिषण्णा सिताब्जे निजकरकमलोद्यल्लेखनीपुस्त
कश्रीः सकलविभवसिद्ध्यै पातु वाग्देवता नः पुरश्च· ल· ९ ऐं नमो भगवति वद वद वाग्देवि स्वाहा अस्य ऋष्यादि पूर्ववत् ध्यानं शुभ्रां स्वच्छविलेपमाल्यवसनां शीतांशुखण्डोज्ज्वलां व्याख्यामक्षगुणं सुधाढ्यकल
शं विद्यां च हस्ताम्बुजैः विभ्राणां कमलासनां कुचनतां वाग्देवतां सुस्मितां वन्दे वाग्विभवप्रदां त्रिनयनां सौभाग्यसंपत्करीम् अस्य पुरश्च· ल· ८ ओं ह्रीं ऐं ह्रीं ओं सरस्वत्यै नमः कण्वार्णस्य ऋष्यादि पूर्ववत् ध्यानं वा
णीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां चन्द्रार्धाङ्कितमस्तकां निजकरैः संबिभ्रतीमादरात् वीणामक्षगुणं सुधाढ्यकलशं विद्यां च तुङ्गस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे पुरश्च· ल· १२ ऐं वाचस्प
तेऽमृते प्लुवः प्लुः ऋष्यादि पूर्ववत् ध्यानं आसीना कमले करैर्जपवटीं पद्मद्वयं पुस्तकं विभ्राणा तरुणेन्दुबद्धमुकुटा मुक्तेन्दुकुन्दप्रभा भालोन्मीलितलोचना कुचभरक्लान्ता भवद्भूतये भूयाद्वागधिदेवता मुनिगणै
रासेव्यमाना निशं पुरश्च· ल· ११ ऐं क्लीं सौः ऋष्यादि पूर्ववत् ध्यानं मुक्ताकारावदाता ... पुस्तकं चोद्वहन्ती आपीनोत्तुङ्गवक्षोरुहभरवि
नम्रमध्यदेशा ... वाचामीडे विराजत्त्रिभुवननमिता पुण्डरीके निषण्णा पुरश्च· ल· १२ अथ पारिजातसरस्वती ओं ह्रीं ह्सौं ह्रीं ओं सरस्वत्यै नमः अस्य मन्त्रस्य ऋषिः त्रिष्टुप् छन्दः पारिजातसरस्वती देवता ध्या
नम् हंसारूढा ... हरवदनीया ... पुर· ल· १२ अथ लक्ष्मी श्रीं भृगुऋ
षिर्निचृच्छन्दः श्रीर्देवता ध्यानम् कान्त्या काञ्चनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् विभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितम्बबिम्बललितां वन्देऽर
ऋषि ५ विन्दस्थितां पुरश्च· ल· १२ होमसहस्र १२ नमः कमलवासिन्यै स्वाहा दक्षिणामूर्तिर्विराट् छन्दः श्रीर्देवता ध्यानं आसीना सरसीरुहे स्मितमुखी हस्ताम्बुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा मुक्ताहा
रविराजमानपृथुलोत्तुङ्गस्तनोद्भासिनी पायाद्वः कमला कटाक्षविभवैरानन्दयन्ती हरिम् पुरश्च· ल· ९ ओं श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः विनियोगस्तु राजीवत् ध्यानं सिन्दूरा
रुणकान्तिमब्जवसतिं सौन्दर्यवारांनिधिं कोटीरांगदहारकुण्डलकटीसूत्रादिभिर्भूषिताम् हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शौ वहन्तीं परां आवीतां परिचारिकाभिरनिशं ध्यायेत्प्रियां शार्ङ्गिणः पुरश्चरणं लक्षम् १
अथ गणपतिमन्त्राः गं अस्य गणक ऋषिः नीवृच्छन्दः गणेशो देवता ध्यानम् सिन्दूराभं त्रिनेत्रं पृथुतरजठरं हस्तपद्मैर्दधानं दन्तं पाशाङ्कुशेष्टान्युरुकरविलसद्बीजपूराभिरामं बालेन्दुद्योतिमौलिं करिपतिवदनं
दाननिर्भरार्द्रगण्डं भोगीन्द्राबद्धमौलिं भजत गणपतिं रक्तवस्त्राङ्गरागम् पुरश्च· ल· ४ क्लीं गं क्लीं महागणपतये स्वाहा अस्य गणक ऋषिः निचृद्गायत्री छन्दः गणाधिपो देवता ध्यानं ... मदजलमुदित ... चन्द्रचूडं त्रिनेत्रं
हस्तैः ... निधिनिकरं रत्नमौलिं भजामः पुरश्च· ल ४ अथ हेरम्बः ओं गं नमः गणक ऋषिः गायत्री छन्दः हेरम्बो देव
ता गं वीजं ... शक्तिः ध्यानं मुक्ताकाञ्चननीलकुन्दघुसृणच्छायैस्त्रिनेत्रान्वितैर्नागास्यैर्हरिवाहनं शशिधरं हेरम्बमर्कप्रभम् दृप्तं दानमभीतिमोदकरदान् ... धानम
जे पुरश्च· ल· ३ ओं हस्तिपिशाचि लिखे स्वाहा अस्य मधीश ऋषिः नीवृच्छन्दः उच्छिष्टगणपतिर्देवता पुरश्च· ल· ४ उच्छिष्टगणेशाय ... प्रसादनाय नमः गणक ऋषिः विराट् छन्दः विघ्नप्रसादनो देवता ध्या
नं पाशाङ्कुशौ कल्पलतां विषाणं दधत्स्वशुण्डाहितवीजपूरः रक्तस्त्रिनेत्रस्तरुणेन्दुमौलिर्हारोज्ज्वलो हस्तिमुखोऽवताद्वः पुर· ल· १ ग्लौं वसिष्ठ ऋषिः गायत्री छन्दः हरिद्रागणपतिर्देवता गं वीजं ... शक्तिः हरिद्राभं चतु
र्बाहुं हारिद्रवसनं विभुं पाशाङ्कुशधरं देवं मोदकं दन्तमेव च ध्यायेद्वरदं देवं हरिद्रागणपं विभुम् पुरश्च· ल· ४ श्रीं लक्ष्मीर्लक्ष्म्या ... मायाद्यं ... वीजाद्यं ओंकाराद्यं निजवीजाद्यं वा ... विद्यान्
चाक्षरसंयुता चतुर्वर्णात्मिका ... जायावधिर्भवेत् अथ सूर्यः ओं घृणिः सूर्य आदित्यः देवभाग ऋषिः गायत्री छन्दः आदित्यो देवता ध्यानं रक्ताम्बुजासनमशेषगुणैकसिन्धुं भानुं समस्तजगतामधिपं भजामि पद्मद्वयाभयवरान्दधतं कराब्जैर्माणिक्यमौलिमरुणाङ्गरुचिं त्रिनेत्रम्
लसत्त्रिनेत्रं ... मौलिं दिननाथमीडे पुरश्च· ल· ८ क्लीं क्लीं ... ध्यानं रक्ताम्बुजासनमशेषगुणैकसिन्धुं भानुं समस्तजगतामधिपं भजामि पद्मद्वयाभयवरान्दधतं ... त्रिनेत्रम्
अथ शिवः ५ पुरश्च· ल· १२ हंसः अस्याक्रऋषिः गायत्री छन्दः गिरिजापतिर्देवता उद्यद्भास्करकोटिप्रकाशनिटिलं ... धानेकरानं दधानं ... शैलं ... अभीतिवरदं परशुं ... मृगं ... विश्वमूलं ...
यं वपुरंजनं ... त्रिनेत्रम् पुरश्च· ल· ९ अथ विष्णुः ओं नमो नारायणाय नारायण ऋषिः गायत्री छन्दः विष्णुर्देवता ध्यानं उद्यत्कोटि ... हेमाभवदातपार्श्वे ... कौस्तुभ ... पीतवासं
धाम्नाचक्र ... नानारत्नोल्लसितविविधाकल्पमापीनवक्षः ... वेदे ... कमलकौमोदकीचक्रहस्तम् पुरश्च· ल· १६ अथ रामः ओं रां रामाय नमः ब्रह्मा ऋषिः गायत्री छन्दः श्रीरामचन्द्रो देवता ध्यानं कालाम्भोधर
कान्तिकान्तमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं पश्यन्तीं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे पुर· ल· ९ अथ षडक्षरः क्लीं रामाय
नमः क्लीं रामा· ऐं रामाय· श्रीं रामाय· ओं रामाय· ब्रह्मसंमोहनस्य ... अग्न्याद्याः ... अथवा कामवीजादेर्मनोर्विश्वामित्र ऋषिः गायत्री छन्दः एतेषां सर्वं पूर्ववत् ॥

अथ ग्रीष्मकल्पः क्लीं गोपीजनवल्लभाय स्वाहा ग्रीष्मिनस्तु त्रिविचारेनवीजरहि नेमनो नारद ऋषिर्विराट् छंदः श्रीकृष्णो देवता क्लीं वीजं स्वाहा शक्तिः ध्यानम् फुल्लेन्दीवरकान्तिमिन्दुवदनं वर्हावतंसप्रियं श्रीवत्साङ्कमुदारकौस्तुभ
धरं पीताम्बरं सुन्दरम् गोपीनां नयनोत्पलार्चिततनुं गोगोपसङ्घावृतं गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजे पु. ल. २२ ॐ नमो भगवते वासुदेवाय प्रजापतिर्ऋषिर्गायत्री छन्दः वासुदेवो देवता ध्यानं विष्णुं शारदचन्द्रकोटिस
दृशं शङ्खं रथाङ्गं गदामम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् आबद्धाङ्गदहारकुण्डलमहामौलिं स्फुरत्कङ्कणं श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतम् पु. ल. १३ ॐ नमो विष्णवे सुरपतये महाबलाय स्वाहा
इन्द्र ऋषिर्विराट् छन्दः विष्णुर्वामनो देवता ध्यानम् मुक्तागौरं नवमणिलसद्भूषणं चन्द्रसंस्थं भृङ्गाकारैरलकनिकरैः शोभिवक्त्रारविन्दम् ... कनककलशं धारयन्तं ... भजामः।
पु. ल. २ अथ हयग्रीवः ॐ श्रीं हंसः ... ब्रह्मा ऋषिरनुष्टुप् छन्दः हयग्रीवो देवता ध्यानं ...
...नवात्रासुरं जातवेदसं ... भजामः पु. ल. २२ अथ नृसिंहः ... नृसिंहो देवता ...
देवता ध्यानम् माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणं वाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं प्रभुम् पु. ल. ३२ त्रै
अत्रिर्ऋषिर्गायत्री छन्दः हकारो वीजं ॐ शक्तिः नृसिंहो देवता ... ध्यानम् कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्याग्निनेत्रं पादादानाभिरक्तं प्रभमुपरिसितं भिन्नदैत्येन्द्रगात्रं श
ङ्खं चक्रं च पाशाङ्कुशकुलिशगदादारुणान्युद्वहन्तं भीमं तीक्ष्णाग्रदंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् पु. च. ल. ३ ... ॐ क्लीं ... हरि
हरो देवता ध्यानं ... भजे पु. च. ल. १ अथ वराहः ॐ नमो भगवते वराहरूपाय भूर्भुवः स्वः पतये भूपतित्वं मे देहि ददापय स्वाहा भार्गव ऋषिर
नुष्टुप् छन्दः आदिवराहरूपी विष्णुर्देवता ध्यानम् आपादं जानुदेशाद्वरकनकनिभं नाभिदेशादधस्तान्मुक्ताभं कण्ठदेशात्तरुणरविनिभं मस्तकान्नीलभासम् ...
... पु. ल. १ अथ ... वामदेव ऋषिः ... छन्दः ... देवता ...
कोटिप्रभम् ... भजे पु. ल. ५ ॐ ... ऋषिर्गायत्री छन्दः ... देवता ध्यानम् ... विलोच
नेत्रि नमस्ते ... पु. ल. ३ ॐ नमो भगवते दक्षिणामूर्तये
मह्यं मेधां प्रयच्छ स्वाहा ... ऋषिर्गायत्री छन्दः दक्षिणामूर्तिर्देवता ... मौक्तिकीमक्षमालाममृतकलशं विद्याज्ञानमुद्राः करान्जैः दधतं ... त्रिनेत्रं विधृतविविधभूषं ...
... पु. ल. १ नमः शिवाय ॐ नमः शिवाय अस्य ... ऋषिः पङ्क्तिश्छन्दः ईशानो देवता ध्यानम् ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् पु. ल. २६ ... २९ ... वटुकाय आपदुद्धारणाय कुरु कुरु वटुकाय ह्रीं ...
... ऋषिर्गायत्री छन्दः वटुकभैरवो देवता पु. ल. २१ अथ भैरवी ... ऋषिः पङ्क्तिश्छन्दः त्रिपुरभैरवी देवता ऐं वीजं ... शक्तिः कामराजः कीलकम् ध्यानम् उद्य
द्भानुसहस्रकान्तिमरुणक्षौमां शिरोमालिकां रक्तालिप्तपयोधरां जपवटीं विद्यामभीतिं वरम् हस्ताब्जैर्दधतीं त्रिनेत्रविलसद्वक्त्रारविन्दश्रियं देवीं बद्धहिमांशुरत्नमुकुटां वन्दे समन्दस्मिताम् पु. ल. १. ल. १२
अथ वाला ऐं क्लीं सौः अस्याः सर्वं पूर्ववत् पु. ल. ३ अथ त्रिपुरसुन्दरी ॐ ह्रीं श्रीं ... दक्षिणामूर्तिऋषिः पङ्क्तिश्छन्दः त्रिपुरसुन्दरी देवता वाग्भवो वीजं कामरा
जः कीलकं ध्यानं वालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनां पाशाङ्कुशशरांश्चापं धारयन्तीं शिवां भजे पु. ल. ८ श्रीं ह्रीं क्लीं ... ॐ ह्रीं श्रीं ... ऐं क्लीं ह्रीं श्रीं इयं का
मराजप्रोक्ता अथ प्रचण्डचण्डिका श्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा श्रीं ह्रीं हूं ऐं वज्रवैरोचनीये हूं हूं फट् स्वाहा ॐ श्रीं ह्रीं क्लीं ऐं वज्रवैरोचनीये ह्रीं क्लीं फट् स्वाहा अयं मन्त्रमहोदधौ भैरव
ऋषिः सम्राट् छन्दः प्रचण्डचण्डिका देवता हूं वीजं स्वाहा शक्तिः स्तनाभौ नीरजं ध्यायेदिति पु. ल. १ अथ काली ... क्रीं १ नाममन्त्राः ... नीलसरस्वती ३ सिद्धकाली ॐ क्रीं क्रीं
क्रीं मे स्वाहा भैरव ऋषिः विराट् छन्दः सिद्धकाली देवता ध्यानं ... त्रिनेत्रां ...
... पु. ल. २२ क्रीं ... दक्षिणकालिके क्रीं ... स्वाहा ...
श्मशानकालिके क्रीं ... स्वाहा ... एतेषां सर्वेषां पूर्ववत् अथ तारामेदः ॐ ह्रीं स्त्रीं हूं फट् ... उग्रतारे हूं फट् वि
श्वरूपासिता ॐ ह्रीं ... हूं फट् द्वितीया विश्वरूपासिता ... द्वितीया ब्रह्मोपासिता ... एकजटा ... नारायणोपासिता ... पु. ल. १ ॐ न
रविद्या ... राजर्षिः ऋषिः गायत्री छन्दः तारा देवता ध्यानं ... चन्द्रकान्तिं कर्त्रीकपालान्वितपाणिपद्मां ... त्रिनेत्रां प्रभजे ... पु. ल. १ ॐ न
मो भगवत्येकजटे ... स्वाहा ... पतञ्जलिर्ऋषिर्गायत्री छन्दः एकजटा देवता पु. ल. १ ॐ ह्रीं श्रीं ... हूं फट् नीलसरस्वत्यै ... स्वाहा ब्रह्मा ऋषिः गायत्री छन्दः नीलसरस्वती दे
वता ध्यानं ... चन्द्रकलावतंसां ... नीलसरस्वतीं ... पु. ल. १ ... स्वाहा
ऋष्यादिकं पूर्ववत् ऐं ह्रीं श्रीं क्लीं सौः ... नीलसरस्वती ... ह्रीं ... स्वाहा विद्याराज्ञीयं ब्रह्मा ऋषिः अनुष्टुप् छन्दः महानीलसरस्वती देवता ध्यानम्

ग. दी. प.
४

इदु नेत्रिः नागेन्द्रः दीप्तः ...
वक्तु नमतो ... याथो ४

ग्रथे =

६४

४

चवर्क

नानासनां सर्पविभूषणाढ्यां कर्त्रीकपालं डमरुं त्रिशूलं करैर्दधानां नरमुंडमालां भजेमहानीलसरस्वतीं नाम् ५ ॥ ल० ४ इतितारामेदाः क्रीं कालीमहाकालीकालीकालीफट्स्वाहा आराध्यप्रजपेन्मंत्र
मष्टोत्तरशतं परं जपमालाविधानं त्वष्टोत्तरेण मानेन च तत्त्वामाकोटराक्षीमसिमलिनमुखीं मुक्तकेशीं रुदंतीं नाहं त्वां मावदंतीं त्रिभुवनमखिलं ग्रासमेकं करोमि हस्ताभ्यां धारयंतीं ज्वलदनलशिखा
संनिभं पाशमुग्रं दंतैर्जंबूफलाभैः परिहरतु भयं पातु मां भद्रकाली ५ ॥ शतमष्टोत्तरम् अथ मातंगी ॐ ह्रीं क्लीं हूं मातंग्यै फट्स्वाहा दक्षिणामूर्तिर्ऋषिः विराट्छंदो मातंगीदेवता ध्यानम् मू
मातंगीं शुक्लशोभां रत्नसिंहासनस्थां वेदैर्वेदंडदंडैरसिखेटककपालपाशांकुशाधरा ५ ॥ सह० ६ शर्करामधुभिर्दक्षां शालेमः अथोच्छिष्टचांडालिनी उच्छिष्टचांडालिनी सुमुखीमहापिशाचिनी
ह्रीं ठः ठः ठः उच्छिष्टचांडालिनी मातंगी सर्ववशंकरी नमः स्वाहा ऐं क्लीं सौः ऐं जों मातंगीं नमामि उच्छिष्टचांडालिनि त्रैलोक्यवशंकरि स्वाहा ध्यानं शवोपरि समासीनां रक्तांबरपरिच्छदां रक्ता
लंकारसंयुक्तां गुंजाहारविभूषितां षोडशाब्दां च युवतीं पीनोन्नतपयोधरां कपालकर्त्रिकाहस्तां परज्योतिःस्वरूपिणीं वामदक्षिणयोगेन ध्यायेन्मंत्रविदुत्तमः धूं धूमावति स्वाहा पिप्पलादऋषिः त्रि भा=
ष्टुप्छंदः धूमावती देवता विवर्णा चंचला दुष्टा दीर्घा च मलिनांबरा विमुक्तकुंतला रूक्षा विधवा विरलद्विजा काकध्वजरथारूढा विलंबितपयोधरा शूर्पहस्तातिरूक्षाक्षा धूतहस्ता वरान्विता प्रवृद्धघोणा तु
भृशं कुटिला कुटिलेक्षणा क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा अथ श्मशानकाली ऐं ह्रीं श्रीं क्लीं कालिके क्लीं श्रीं ह्रीं ऐं भृगुऋषिः नीवृच्छंदः श्मशानकाली देवता ध्यानं अंजनाद्रिनिभां देवीं
श्मशानालयवासिनीं रक्तनेत्रां मुक्तकेशीं शुष्कमांसातिभीषणां पिंगाक्षीं वामहस्तेन मद्यपात्रसमांसकं सद्यःकृत्तशिरो दक्षहस्तेन दधतीं शिवां स्मितवक्त्रां सदा मांसचर्वणतत्परां नानालंकारभूषांगीं नग्नां म
त्तां सदा मदैः ५ ॥ ल० ११ ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ३६ मुखविना ३४ अनयोर्नारदऋषिः त्रिष्टुप्छंदः बगलामुखी देवता ध्यानं
वंदे सुधाब्धिमणिमंडपरत्नवेदिसिंहासनोपरिगतां परिपीतवर्णाम् पीतांबराभरणमाल्यविभूषितांगीं देवीं नमामि धृतमुद्गरवैरिजिह्वां जिह्वाग्रमादाय करेण देवीं वामेन शत्रून्परिपीडयंतीं गदाभिघातेन
च दक्षिणेन पीतांबराढ्यां द्विभुजां नमामि ५ ॥ ल० १ दशविद्याः संपूर्णाः ॥ अथ कात्यायनी ऐं क्लीं ह्रीं चंडिकायै नमः कपिलो मुनिः गायत्री छंदः चंडिका देवता व्याघ्रचर्मपरीधाना मुंडमा
ला विभूषिता रक्तवर्तुलभीमाक्षी जिह्वया लोलया सदा चर्वयंती महाकाली कालरात्रिः शिवा परा नौमि तां जगत्सर्वं संहरंतीं पर्वते अथ दुर्गा ह्रूं ह्रूं स्वाहा क्लीं ह्रूं फट् ह्रीं ह्रूं स्वाहा श्रीं ह्रूं स्वाहा क्लीं ह्रूं ह्रूं
फट् अंगकल्पनं दीर्घस्वरयुक्तेन सिंहस्कंधाधिरूढां नानालंकारभूषितां चतुर्भुजां महादेवीं नागयज्ञोपवीतिनीं रक्तवस्त्रपरीधानां बालार्कसदृशीं तनुं नारदाद्यैर्मुनिगणैः सेवितां भजसुंदरीं ५ ॥
ल० ४ विस्तरस्तत्र सारे अथ गरुडः क्षिप ॐ स्वाहा रुद्रऋषिः पंक्तिश्छंदः पक्षीन्द्रो देवता वर्णानेव विष्णुमातरकमलगतं पंचभूतात्मवर्णैः हस्ताकल्पफलाभिरमयवरकरं पद्मनेत्रं सुवक्त्रं ५
गाढिकेदंडं समुद्दविलं विषघ्नं तालंपाणिभूतं प्राणमीपिनं एवं त्रिवेदीतनुमसमनमयं पक्षिराजं भजेहं ५ ॥ ल० १ हनुमान् हौं हस्फ्रें ख्फ्रें हस्रौं हस्ख्फ्रें हसौं हनुमते नमः रामचंद्रऋषिः गायत्री छं
दः हनुमान्देवता हसौं बीजं हस्फ्रें शक्तिः बालार्कायुततेजसं त्रिभुवनप्रक्षोभकं सुंदरं सुग्रीवादिसमस्तवानरगणैः संसेव्यपादांबुजं नादेनैव समस्तराक्षसगणान्संत्रासयंतं प्रभुं श्रीमद्रामपदांबुजस्मृ
तिरतं ध्यायामि वातात्मजं ५ ॥ सह० १२ ॐ नमो भगवते आंजनेयाय महाबलाय स्वाहा ईश्वरऋषिः अनुष्टुप्छंदः हनुमान्देवता हं बीजं स्वाहा शक्तिः दहनतप्तसुवर्णसमप्रभं भयहरं हृदये
विहितांजलिं श्रवणकुंडलशोभिमुखांबुजं नमत वानरराजमिहाद्भुतं ५ ॥ स० १ कुबेरः यक्षाय कुबेराय वैश्रवणाय धनधान्याधिपतये धनधान्यसमृद्धिं मे देहि दापय स्वाहा विश्रवा ऋषिः बृहती
छंदः धनेशो देवता मनुजवाह्यविमानवरस्थितं गरुडरत्ननिभं निधिनायकं शिवसखं मुकुटादिविभूषितं वरगदे दधतं भज तुंदिलम् ५ ॥ ल० १ ॐ श्रीं ॐ ह्रीं श्रीं ह्रीं क्लीं श्रीं वित्तेश्वराय
नमः इत्यादिकं पूर्ववत् अथ कार्तवीर्यः ॐ फ्रों व्रीं क्लीं भ्रूं आं ह्रीं क्रों श्रीं हुं फट् कार्तवीर्यार्जुनाय नमः दत्तात्रेय ऋषिः अनुष्टुप्छंदः कार्तवीर्यार्जुनो देवता ओं बीजं नमः शक्तिः उद्यत्सू
र्यसहस्रकांतिरखिलक्षोणीधवैर्वंदितो हस्तानां शतपंचकेन च दधच्चापानिषूंस्तावता कंठे हाटकमालया परिवृतश्चक्रावतारो हरेः पायात्स्यंदनगोरुणाभवसनः श्रीकार्तवीर्यो नृपः ५ ॥ ल० १ दे
ह्रीं क्लीं चामुंडायै नमः अयं चंडीनवार्णः अथ वास्तुयाग आनुषंगिकादि अघकपोत्तमशुक्लशर्मा लग्ने प्रालंबं लिखेत् पुण्याहं च कृत्वा सोमं वास्तुयागकर्तव्ये तत्त्वामहं ... यथाविधि नैकमेकं
रुद्रकरवालीत्रिशूलिवृषने ... प्रथमचतुरस्रचतुःषष्टिकोष्ठात्मकमंडलं निर्माय तन्मध्ये पूर्वापरं चतुःकोष्ठात्मकं मध्ये ब्रह्मस्थानं ... स्थाने
... अष्टदल ... कोष्ठ ... द्विधा ... सविताराशक्रमित्ररुद्रजयः आप आपवत्सक ... ब्रह्मा
जंभकं पिलपिंजकं चरकीं विदारीं पूतनां कर्णसूत्रेण ... ईशान पर्जन्य जयंत शक्र भास्कर सत्य भृश अंतरिक्ष दक्षिणस्यां अग्नि पूषण
वितथ यम गृहक्षतक गंधर्व भृंगराज मृग पश्चिमायां निर्ऋति दौवारिक सुग्रीव वरुण पुष्पदंत असुर शोष रोग उत्तरस्यां वायु नाग मुख्य सोम भल्लाट अर्गल दिति अदिति पूजयेत् ...
मेव ... अथायं क्रमः वास्तुमंडले लिखित्वा अष्टदलकर्णिकां ... समस्तवर्तुलभद्रमंडलस्थान् ... कर्णिकायां मंडूक काला
ग्निरुद्र मूलप्रकृति आधारशक्त्यादि ... मायामेव ... मध्ये च अणिमा महिमा लघिमा गरिमा ईशिता
वशिता प्राकाम्य प्राप्ति सर्वसिद्धि नवशक्तीः संपूज्य सर्वज्ञानक्रियात्मककमलासनाय योगपीठाय नमः इति मध्ये पीठं संपूज्य अक्षमाला ... दंडकमंडलुं वामहस्ते धारयेद्ध्यानं ... नेत्रं चतुर्मुखं ... जाप
सन ब्रह्माणमावाह्य ॐ नमो ब्रह्मणे इति मंत्रेण पंचोपचारादिभिः पूजयेत् ... स्थानेषु ... पूजयेत् यथा ... कपाणये ब्रह्मणे ... नमः
ष्वे = ... स्थानेषु ... मरीच्यादि ... विवस्वते रक्तं मित्र सवर्णाभ भूधर ... सविता नील सावित्री ... इन्द्र अरुण इन्द्रजय ... रुद्रजय पीत आ
पधवल आपवत्स ... ईशानं धवल पर्जन्यं जयंत ... आदित्यं रक्त सत्य ... अग्निं ... दिनकराभं पूषणं ... वितथं ...
गृहक्षतं विद्युदाभं यमं ... गंधर्वं ... भृंगराजं ... मृगं ... निर्ऋतिं ... दौवारिकं पीतं सुग्रीवं नीलं ... पुष्पदंतं ... वरुणं स्फटिकाभं असुरं ... शोषं ... रो
गमिंद्रनीलाभं वायुं ... नागं ... मुख्यं मौक्तिकाभं भल्लाटं ... सोमं स्फटिकाभं अर्गलं ... दितिं ... धवलां अदितिं कपिलां चरकीं ... विदारीं पावकद्युतिं पूतनां
... पिलपिंजकीं ... सर्वेषां ... जंभकं पीतं ... ततः पूर्वादि ... कुंडस्थंडिलं वा निर्माय तत्र वक्ष्यमाणक्रमेण ...
